तदा हि दह्यते सर्व्वं त्रैलोक्यं भूर्भुवादिकम् ।
जनं प्रयान्ति तापार्त्ता महर्लोकनिवासिनः ॥”
इति वह्निपुराणम् ॥
“चतुर्थे तु महर्लोके तिष्ठन्ति कल्पवासिनः ॥”
इति देवीपुराणम् ॥

महर्षभी, स्त्री, ( महती चासौ ऋषभी चेति कर्म्मधारयः ।) कपिकच्छुः । इति राजनिर्घण्टः ॥

महर्षिः, पुं, (महांश्चासौ ऋषिश्चेति ।) व्यासादिः । इति त्रिकाण्डशेषः ॥ अस्य व्युत्पत्त्यादिर्यथा,—
“ऋषिर्हिंसागतौ धातुर्व्विद्यासत्यतपःश्रुतैः ।
एष सन्निचयो यस्माद्ब्रह्मणश्च ततस्त्वृषिः ॥
निवृत्तिसमकालन्तु बुद्ध्या व्यक्तिर्व्यविस्त्वयम् ।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः ॥
गत्यर्थादृषतेर्धातोर्नामनिर्वृत्तिकारणम् ।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता ॥
तेनेश्वराः स्वयम्भूता ब्रह्मणो मानसाः सुताः ।
निवर्त्तमानैस्तैर्ब्बुद्धा महान् परिगतः परः ॥
यस्मादृषिः परत्वेन महांस्तस्मान्महर्षयः ।
ईश्वराणां सुतास्तेषां मानसाश्चौरसाश्च वै ॥
ऋषयस्तत्परत्वेन भूतादिऋषयस्ततः ।
ऋषिपुत्त्रा ऋषीकास्तु मैथुनाद्गर्भसम्भवात् ॥
परत्वेनर्षयस्ते वै भूतादिऋषिकास्ततः ।
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपुत्त्रकाः ॥
श्रुत्वा ऋषं परत्वेन नाम तस्मात् श्रुतर्षयः ।
अव्यक्तात्मा महानात्माहङ्कारात्मा तथैव च ॥
भूतात्मा चेन्द्रियात्मा च तेषान्तु ज्ञानमुच्यते ।
इत्येवन्त्वृषिजातिस्तु पञ्च तान् नामभिः शृणु ॥
भृगुर्म्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः ।
मनुर्द्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश ॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः ।
परत्वेनर्षयस्तस्माद्भूतास्तस्मान्महर्षयः ॥”
इति मात्स्ये १२० अध्यायः ॥

महल्लकः, पुं, ( महतः स्त्रीरक्षादिरूपान् विपुलान् भारानित्यर्थः लाति गृह्णातीति । ला+“आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः । ततः स्वार्थे कन् । यद्वा, महान्तं परिचगुणं लकति आस्वादयतीति । लक आस्वादने+अच् ।) अन्तःपुररक्षकः । तत्पर्य्यायः । सौविदल्लः २ कञ्चुकी ३ स्थापत्यः ४ सौविदः ५ विराङ्गः ६ । इति जटाधरः ॥ सौविदल्लकः ७ अन्तर्वंशिकः ८ । इति शब्दरत्नावली ॥

महल्लिकः, पुं, (महान्तं परिचगुणं लिखतीवेति । महत्+लिख+कः । पृषोदरादित्वात् साधुः ।) अन्तःपुररक्षकः । खोजा इति भाषा ॥ तस्य लक्षणं यथा,—
“मुष्कमूत्रोऽनुपस्थे यः स्त्रीस्वभावो महल्लिकः ॥”
इति शब्दमाला ॥

महसं, क्ली, ( मह्यते पूज्यतेऽनेनेति । मह+“अत्यविचमितमिनमीति ।” उणा० ३।११७ । इति असच् ।) ज्ञानम् । प्रकारः । इत्युणादिकोषः ॥

मही, स्त्री, ( मह्यते पूज्यते इति । मह+घ । स्त्रियां टाप् ।) गोपवल्ली । इति शब्दचन्द्रिका । गोरचचाकुलिया इति भाषा ॥ स्नीगवी । इति शब्दरत्नावली ॥

महाकच्छः, पुं, ( महान् विपुलः कच्छो जलप्रायदेशोऽस्य ।) समुद्रः । वरुणः । इति मेदिनी । छे, ६ ॥ पर्व्वतः । इति शब्दरत्नावली ॥

महाकण्टकिनी, स्त्री, ( महती चासौ कण्टकिनी चेति ।) विश्वसारकम् । इति शब्दचन्द्रिका । फणिमनसा इति भाषा ॥

महाकन्दः, पुं, ( महांश्चासौ कन्दश्चेति ।) रसोनकः । इत्यमरः । २ । ४ । १४८ ॥ मूलकम् । इति शब्दरत्नावली ॥ चाणक्यमूलकम् । रक्तलशुनम् । राजपलाण्डुः । इति राजनिर्घण्टः ॥

महाकपित्थः, पुं, ( महांश्चासौ कपित्थश्चेति ।) बिल्ववृक्षः । इति त्रिकाण्डशेषः ॥

महाकरञ्जः, पुं, ( महांश्चासौ करञ्जश्चेति ।) करञ्जविशेषः । बड़ करञ्जा इति भाषा ॥ तत्पर्य्यायः । षड्ग्रन्था २ हस्तिचारिणी ३ उदकीर्य्यः ४ विषघ्नी ५ काकघ्नी ६ मदहस्तिनी ७ शारङ्गेष्टा ८ मधुमती ९ रसायनी १० हस्तिरोहणकः ११ हस्तिकरञ्जकः १२ सुमनाः १३ काकभाण्डी १४ मधुमत्ता १५ । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । कटुत्वम् । विषकण्डूविचर्च्चिकाकुष्ठत्वग्दोषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

महाकर्णिकारः, पुं, (महांश्चासौ कर्णिकारश्चेति ।) आरग्वधः । इति राजनिर्घण्टः ॥

महाकायः, पुं, ( महान् कायोऽस्य ।) नन्दी । स च शिवद्वारपालः । इति त्रिकाण्डशेषः ॥ ( यथा, महाभारते । १३ । १५० । २४ ।
“नन्दीश्वरो महाकायो ग्रामणीर्वृषभध्वजः ॥”)
हस्ती । इति केचित् ॥ ( महान् कायः शरीरमिति ।) बृहत् शरीरम् । तद्वति, त्रि ॥ (यथा, महाभारते । १ । १५६ । २९ ।
“महाजवं महाकायं महामायमरिन्दमम् ॥”
स्त्रियां टाप् । कुमारानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । २४ ।
“रोहिताक्षी महाकाया हरिपिण्डा च भूमिप ! ॥”)

महाकार्त्तिकी, स्त्री, ( महती चासौ कार्त्तिकी चेति ।) रोहिणीनक्षत्रयुक्ता कार्त्तिकीपूर्णिमा । यथा,—
“प्राजापत्यं यदा ऋक्षं तथैतस्यां नराधिप ! ।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा ॥”
इति पाद्मे २ खण्डे ३ अध्यायः ॥

महाकालः, पुं, ( महांश्चासौ कालश्चेति ।) विष्णुस्वरूपाखण्डदण्डायमानसमयः । यथा । कालो घटवान् महाकालत्वात् । इति सिद्धान्तलक्षणम् ॥ महादेवः । ( तन्निरुक्तिर्यथा महानिर्व्वाणतन्त्रे । ४ । ३१ ।
“कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः ।
महाकालस्य कलनात् त्वमाद्या कालिका परा ॥”)
प्रमथगणविशेषः । इति मेदिनी । ले, १५९ ॥ (उज्जयिनीस्थशिवलिङ्गविशेषः । यथा, कथासरित्सागरे । ११ । ३१—३२ ।
“अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः ।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् ॥
यस्यां वसति विश्वेशो महाकालवपुः स्वयम् ।
शिथिलीकृतकैलासनिवासव्यसनो हरः ॥”
तीर्थविशेषः । यथा, महाभारते । ३।८२।४७ ।
“महाकालं ततो गच्छेत् नियतो नियताशनः ।
कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत् ॥”)
लताविशेषः । माकाल इति भाषा ॥ तत्पर्य्यायः । उरुकालः २ किम्पाकः ३ काकमर्द्दकः ४ । इति रत्नमाला ॥ काकमर्द्दः ५ देवदालिका ६ दाला ७ दालिका ८ जलङ्गः ९ घोषकाकृतिः १० । इति राजनिर्घण्टः ॥ (यथा,
“अन्तर्मलिनदेहेन बहिराह्लादकारिणा ।
महाकालफलेनेव कः खलेन न वञ्चितः ॥”
इत्युद्भटः ॥ )
शिवपुत्त्रविशेषः । तस्य जन्मवृत्तान्तं यथा,—
श्रीदेवा ऊचुः ।
“एष वैश्वानरः श्रीमान् भूरितेजोमयो बली ।
महामैथुनवीजन्तु त्वत्तेजः संग्रहीष्यति ॥
इत्युक्ता त्रिदशाः सर्व्वे वीतिहोत्रं पुरःस्थितम् ।
तस्मै निदेशयामासुः सम्भवे सर्व्वहेतवे ॥
ततः षड्ङ्गं स्वं रेतो वाह्निर्दहनानने ।
उत्ससर्ज्ज महाबाहुर्महामैथुनकारणम् ॥
अग्नावुत्सृज्यमानस्य तेजसः शम्भुदृम्भतः ।
अत्युद्ध्यमतिस्वल्पं गिरिप्रस्थे पपात ह ॥
तयोः कारणयोः सद्यः संभूतौ शङ्करात्मजौ ।
एको भृङ्गसमः कृष्णो भिन्नाञ्जननिभोऽपरः ॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत् ।
महाञ्जनैकरूपस्य महाकालेति लोकभृत् ॥
ततस्तौ पालयामास शङ्करः प्रमथोत्करैः ।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ ॥
प्रवृद्धौ तौ महात्मानौ हरोमाप्रतिपालितौ ।
क्रमाद्गणेशौ कृत्वा तौ हरो द्वारि न्ययोजयत् ॥”
इति कालिकापुराणे ४५ अध्यायः ॥
तस्य वानरमुखकारणं जन्मान्तरञ्च यथा,—
“अथैकदोमया सार्द्धं निगूढे रतिमन्दिरे ।
नर्म्माकरोन्महादेवो मोदयुक्तो रतिप्रियः ॥
यदा सा नर्म्मणे याता गौरी शरदरान्तिकम् ।
तदा भृङ्गिमहाकालौ द्वास्थौ द्वारि प्रतिष्ठितौ ॥
नर्म्मावसाने सा देवी मुक्तधम्मिल्लबन्धना ।
ग्रन्थिहीनगलद्गात्रा वस्त्रमालम्ब्य पाणिना ॥
व्यस्तहारा गन्धपुष्पैराकुलैर्नातिशोभना ।
विलुप्तकुङ्कुमा दष्टदशनच्छदविभ्रमा ॥
निःसृता रतिसङ्केतशालाया ललनासना ।
ईशदाघूर्णनयना निचिता स्वेदबिन्दुभिः ॥